No. ४७८४ — ४७८९

Title ~~क्र॰~~ गणेशकृष्णचतुर्थी व्रतोद्यापनं। भीमसेनै-
कादशी व्रतोद्यापनम्

Author ×

Extent (२४) ~~८~~ पत्राणि Age ×

Subject धर्मशास्त्रम्

4 क गणेशचतुर्थीव्रतोद्यापनम् ६

5 ख चन्दनषष्ठीव्रतोद्यापनम् ४ २

6 ग बुधाष्टमीव्रतोद्यापनम् ५

7 घ कृष्णाष्टमीव्रतोद्यापनम् मत्स्यपुराणे ८/४

8 ङ शुक्लाष्टमीव्रतोद्यापनम् मत्स्यपुराणे ४/३

9 च भीमसेनैकादशीव्रतोद्यापनम् २

४७८४ — ४७८९

ग॰च॰ उ॰ २ ॐ श्रीगणेशाय नमः ॥ अथ गणेशचतुर्थीव्रतोद्यापनं लिख्यते ॥ ॐ विनायकचतुर्थ्यास्तु व्रतं वक्ष्यामि
तेऽधुना । सर्वार्थसाधकं चारोग्यं समीहितफलप्रदम् । विघ्नोपशमनायालं सर्वकामार्थसिद्धिदं । प्रियपत्रया
तिनित्यं ऋषिभिश्चाप्युपासितम् । फाल्गुनस्य चतुर्थ्यां तु ग्राह्यं व्रतमिदं महत् । नक्ताहारेण विप्रेन्द्र तिलान्नेन पा
रणं स्मृतम् । तद्देववह्निहोतव्यं ब्राह्मणाय च तत्सदा । दद्यात्तद्देवनैवेद्यं विघ्नराजाय संयमी । यजेद्गणपतिं रात्रौ
गन्धपुष्पैर्यथाक्रमम् । सतिलं मृत्तिकास्नानमाम्भस्तापितेऽङ्कुसाम्भसा । फाल्गुनादिषु मासेषु नामभिश्चा
र्चयेद्व्रती । विनायकैकदन्तश्च कृष्णपिङ्गो गजाननः । लम्बोदरो भालचन्द्रो हेरम्बो विकटस्तथा । वक्रतुण्डश्चाखु
रथो विघ्नराजो गणाधिपः । इत्येवमासनामाश्रावजपहोमसमर्चनम् । कृत्वैव प्रार्थयेत्पश्चान्मन्त्रेणानेन भक्तिमा
न् । हेमातुराय वीराय परशुधृतपाणये । विघ्नप्रायैकदंष्ट्राय नमो लम्बोदराय च । नमस्ते गजवक्त्राय सर्वज्ञाय सु
मूर्तये । समीहितार्थसंप्राप्त्यै निर्विघ्नं कुरु मे सदा । भोजयित्वा ततो विप्रान्यथाशक्त्या विमत्सरः । भुञ्जीत च स्वयं
नक्तं वाग्यतो नमकृत्सयन् । सायंप्रातः सर्वेषां भोजने श्रुतिचोदितम् । एकभक्तं परं तस्मादुपवासो ततोऽधिकः ।
उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचितम् । अयाचितात्परं नक्तं तस्मान्नक्तपरो भवेत् । देवैस्तु भुक्तं पूर्वाह्णे मध्या
ह्ने मानुषैस्तथा । अपराह्णे न पितृभिः सन्ध्यायां प्रेतराक्षसैः । वेलां सर्वां स्वतिक्रम्य नक्तभोजी हि यो भवेत् । सतैलं
तर्पितं सर्वं तत्पुण्यं तदवाप्नुयात् । हविष्यभोजनं स्नानमाहारल्पबलाघवं । अग्निकार्यमधःशय्यां नक्तभोजी
समाचरेत् । एवं संवत्सरस्यान्ते व्रते पूर्णे गजाननम् । सौवर्णमथवा रौप्यमधिवास्य प्रयत्नतः । ताम्रपात्रैर्हृदि द
शाभिर्मृण्मयैर्वाथ वा नवैः । तिलदर्भोदकैः पत्रैः प्रातर्विप्राय चार्चयेत् । दद्यात्तु विधिवद्भक्त्या वृषभं च गवा
सह । भोजयेद्ब्राह्मणान्भक्त्या वित्तशाठ्यविवर्जितः । इत्थं व्रतमिदं कृत्वा सर्वविघ्नैर्विमुच्यते । विद्याश्रियं यशः २

सोऽपत्यं प्राप्नोत्यविकलं सदा अपुत्रो लभते पुत्रं दरिद्रस्तु तथा धनं कन्यार्थी लभते कन्यां मोक्षार्थी च शुभां
गतिं श्रूयते च पुरा राजा श्रीमानृतुपरो नृपः अविद्धनो महातेजा धर्मनित्यः प्रतापवान् चतुःसागरपर्यन्तामजि-
तेमां वसुन्धरां प्रशशास प्रजाः सर्वाः प्रजापरिवापराः तस्य विद्युत्प्रभा नाम भार्या परमशोभना अती-
व रूपसंपन्ना नयनोत्सवकारिणी मयदामासमं पुत्रं न लेभे स लब्धवानपि तदानीं ब्रूते नृपस्तस्यै सभार्यो देविका-
तटे तपसागम्य चादेहं संवर्तमुनिसत्तमः किं ते विवक्षितं कार्यं किमर्थं तप्यते नृपः स एवमुक्तो राजर्षिन-
त्वा वृद्धमभिवाद्य च कृताञ्जलिपुटो भूत्वा योगीश्वरमथाब्रवीत् अपुत्रोऽस्मि मुने प्रोच्यो योगहितं स्मर सत्तु प्रभो
तेनाहं तप आस्थाय क्षेपयिष्ये कलेवरं वृथाश्रुतं वृथा शोऽस्मि मपुत्रस्याधुनाऽत्र मे धन्यास्त एव लोकेऽस्मि-
न्ये विनश्यत्सु जन्मिनः येषां पुत्रस्तु सौमीत्ते स्वर्गद्वारमिवापरं श्रुत्वैवं वचनं धर्म्यं संवर्तस्तस्य धीमतः आच-
चक्षे व्रतं तस्य पुत्रावाप्तिगवास्ततः स चाप्यविद्धनृपश्रेष्ठो समिधानमिदं व्रतम् वर्षमेकं सभार्यस्तु शुचिः अय-
तमानसः कृतवानेष महाभागं गणाध्यक्षं जन्माविनायकः प्रसन्नस्त्वाह विघ्नेशो वरं वृणीहि पार्थिव स च वव्रे वरं श्री-
मान्पुत्रं शिवपुत्रादमाहृतः अपत्यं देहि मे देव सर्वशास्त्रार्थपारगं असंख्यातगुणं वीरं ब्रह्मण्यं वनकल्मषम्
धर्मज्ञं च महाज्ञानं प्रख्यातिबलपौरुषम् सम्मानितं च परस्थाने प्रयच्छ गणनायकम् यतस्त्वत्तोऽपि पदं नाम यत्राग-
त्वा न शोचति एवमस्त्विति चोक्त्वा तत्रैवान्तरधीयत सोऽप्येवं तत्क्षणात् राजा स्वपत्न्या लब्धवान्सुतं स्वभागं स
महाकीर्तिमनेकक्रतुयाजुकम् यस्य प्रणामी हृगायन्ती लोके वेदविदो द्विजः मरुत्त इत्यभिविख्यातो मरुत्तस्याव-
सन्तुष्टे अविद्धतस्य कामप्रविष्टे देवाश्च सभासदः प्राप्य परमनीलस्य मज्जरीं नर्मकृत्स्नपाः नीलो महद्गत-
स्तोऽतस्यासन्निधयोत्तयाः राजापि तं सुतं लब्ध्वा चक्रवर्तं स्वतनं पिसन् भुक्त्वा स विविधान्भोगाल्लेभे च परमां गतिं

कृ॰च॰ ३॰ हयमेधस्याविघ्नेन तु यज्ञेन मनरः स्तुताः एतद्देवव्रतं कुर्यात्तु नरस्तल्लयपदं यान्तु यात् अर्थान्मवर्धयति वर्धयन्ती ह्य
मेकामं प्रसादयति तस्य पिनष्टपापं यः पूजयन्ति सकिलिलोकनतां घ्रियुग्मं गौरीसुतं फणितलोदरमादिदेवं
विघ्नस्य तस्य न भवन्ति गृहे कदाचिद्धर्मार्थकामसुखसिद्धिविधानकाय यस्य प्रभमीनु सुधाकलाकृति कांतिदन्तं
विघ्नेशमर्चयति नक्तकृतीचतुर्थ्याम् आनन्दनं सकलपापहरं चतुर्थ्यां यास्त्री करोति विधवा सधवाथ कन्या
३ सा स्वे गृहे सुखमानान्यनुभूय भूयो हेरम्बमान्समदनं मुदिता प्रयाति एवं च यः प्रकुरुते वरदं चतुर्थ्यां विनाय-
की विविधवदूसकान्तकान्तिः सौभाग्यभाग्यकशाकलांकितयोरवस्य स्थानं प्रयाति परमेव सुखस्वरूपम्
स्थविरगणपतिये पूजयन्ति मासकृद्यथि समुपैत्य ये त्वधमस्ते दोषास्तु मर्त्याः छिद्रवदनमीड्यं ते प्रयान्ति वधन्या [illegible] विघ्ना
वपरमयरत्ने लोचने पीयमानाः अन्यच्च अथ शुक्लाया चतुर्थ्यां च फाल्गुने मासि सर्वदा संपूज्य परया भक्त्या
विनायकादिसर्वतः द्वादशारं लिखेत्पद्मं पञ्चवर्णैस्सुशोभितम् तन्मध्ये प्रतिमां पूज्या नामभिः प्रतिमासिकं
लम्बोदराद्याश्चाष्टौ लोकपालास्ततो बहिः हेरम्बं चार्चयेद्रात्रौ तृतीयायामुपोषयेत् ततः प्रातस्तु तथ्यां च ब्रा
ह्मणान्पूजयेन्मासिकान् अर्चयेत्पूजयेत्तत्र कलशान्निर्वपेत्ततान् अध्वर्ययेत्प्रतिमां मक्रमनत्यायुतिपादयेत्
गणानान्त्वेतिमन्त्रेण समिद्धोत्थसहस्रशः निष्ठुमीढं गणपतिं दधाद् तिलैः तन्तुरुषं ति मन्त्रेण या-
न्याम्स्तेन सर्वेदा [illegible] कुर्यात् कृष्णा [illegible] पावमानकम् प्रयोजनेषु वामेव [illegible] सो-
मारौद्रं चुच्चित्स्नानं दत्वो यत्र पावमान्यथ रात्रिसूक्तं ग्रहाणां तु साध्याये चैत्रे विधिकम् वास्तुष्पतेतथा दुर्गा
लेत्रेशान्तत्र चार्चयेत् होमान्तेव ततो दद्यात् देवं वस्त्रेण संयुतम् माषमेकन्तु वर्णेन प्रतिमां कारयेद्बुधः विघ्न
राज्ञान्तु सारेण हाटकेन कम् अथापि वा तथा दत्वा विनायक नमस्तुभ्यं भालचन्द्राय वै नमः नमः कृत्वापि

ॐ लेशागजाननमोस्तुते लम्बोदरनमस्तुभ्यं महोत्कटनमोनमः हेरम्बायनमस्तेस्तु नमो विकटनासिके
नमस्ते वक्रतुण्डाय नमस्त्वाखुरथाय च विघ्नराजनमस्तुभ्यं गजराजायवैनमः मध्येत्वप्रतिमां पूज्य गणेशा
म्बिकयायुत नमस्ते गणनाथाय नमस्ते चण्डविक्रमे गणेशाय नमस्तुभ्यं विघ्नान्तक नमोस्तुते नमो मूष
कनाथाय भीमस्वामिन्नमोस्तुते गाङ्गेयाय नमस्तुभ्यं गणेश्वर नमोस्तुते गजानननमस्तुभ्यं दंष्ट्राधारे नमो
स्तुते गणाध्यक्ष नमस्तेस्तु नमस्ते विकटानन लम्बोदरनमस्तेस्तु महोत्कट नमोस्तुते जम्बुकाय नमस्तु
भ्यं लोकेशाय नमोनमः विश्वकेतननमस्तुभ्यं हेमकुम्भ नमोस्तुते नायकाय नमस्तेस्तु विघ्नेशाय नमोनमः
विश्वरूप नमस्तेस्तु घटोदर नमोनमः त्रिनेत्राय नमस्तुभ्यं वामनाय नमोनमः लम्बोष्ठाय नमस्तुभ्यं शूर्पक
र्णाय वै नमः वरदाय नमस्तुभ्यं भीमरूप नमोनमः हेरम्बाय नमस्तुभ्यमेकदन्ताय वै नमः लम्बोदरनमस्तु
भ्यं वरदानन्ददायिने सप्तविंशतिनामानि नित्यं यः प्रयतः पठेत् नस्य न बाधते पीडा न भयं न च दुष्टग्रहम्
उत्तीर्णस्सर्वपापेभ्यो गतिं प्राप्नोति शाश्वतीं विनायकाय नमः भालचन्द्राय नमः भीमस्वामिने नमः व
क्रतुण्डाय नमः आखुरथाय नमः गणेशाय नमः विश्वरूपाय नमः त्रिनेत्राय नमः मन्मथाय नमः
विश्वकेतनाय नमः वरदाय नमः हेरम्बस्वरूपाय नमः महागणपतये नमः इति मासिकानाम ततः
बहिर्लोकपालाष्टकम् पूर्वे लम्बोदराय नमः आग्नेये गजाननाय नमः दक्षिणे विकटाननाय नमः नै
ऋते भीषणाय नमः पश्चिमे विश्वकेतनाय नमः वायव्ये दीर्घनासिकाय नमः उत्तरे गणराजाय नमः
ईशाने गजाननाय नमः मध्ये महागणपतये नमः पाद्यार्घ्याचमनीयं च रक्तचन्दनलेपितं रक्तपुष्पो
स्तु संपूज्य सधूपं तण्डुलं तथा पायसं मोदकापूपैः स्वर्णाद्यैर्वा निवेदयेत् वेदोक्तेन विधानेन वह्निमावा

च ३ इयेहिभूम् नामधेयेननिर्वाप्याय्यायसंगृह्यसंयुतम् ॥ अथात्र तन्त्रविधिः अत्रादौ गोमयेन भूमौ उपलि
प्यअष्टदलं लेखयेत् दक्षिणतः पूर्वादिष्वष्टदलद्वादशान् लेखयेत् मध्ये त्रयोदशं नामप्रदेशान्पूर्वे
कलशान्द्वादशान्स्थापयेत् भद्रपीठादि अध्वर्यो यमित्यादि पुत्रो देवी हितं प्रजम् गणानां त्वा गणपतिं नि
षुसीद गणपते तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् ३ इति मन्त्रत्रयेण ब्रह्मकल
शे संपूज्य अग्नये नमः वायवे नमः सूर्याय नमः ब्रह्मणे नमः प्रजापतये नमः कुम्भकर्णाय नमः त
तो दक्षिणतः मासकलशानां निषुसीद गणपते गणानां त्वा इति मन्त्रद्वयेन पूर्वादिषु प्रदक्षिण
नामतस्तु विनायकाय नमः इत्यादि इन्द्राय वेतादि सर्वमन्त्रं कृत्वा गणमर्चयेत् मधुपर्कं निवेदयेत् ततः
यजमानो दक्षिणतः प्राङ्मुख उपविश्य न्यासकर्म कुर्यात् प्रयोजनं तेनिरञ्जनस्य कोनेयस्य प्रयोजनं तेति
वामकरे प्रयोजनं तेविद्वाग्रस्य वन्नु विश्वादेवानां जनिमा विवक्ति ब्रह्मा ब्रह्मण उज्जभार मध्यान्नीचाउ
च्चास्वधयाभिप्रतस्थौ महान्महे इति दक्षिणकरे महान्मही अस्कभायद्विजातो द्यां द्विता पार्थिवं च रजः स
बुध्नादाष्टजनुषाभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् गणानां त्वा वामपादे सस्नुषुभा दक्षिणपादे सस्नुषुभा
मस्य क्रतानागरेन बलेन रुजफलिगं रवेण बृहस्पतिरुस्त्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् अग्ने
हृत्के वामजानु अग्नेहृत्के उरोहितो ग्रावा वाणो बर्हिरध्वरे ऋचा यामि मरुतो ब्रह्मणस्पतिं देवानां अवो वरेण्यं
उत्तिष्ठ ब्रह्मणस्पते दक्षिणजानु उत्तिष्ठ ब्रह्मणस्पते देवायन्तस्त्वेमहे उपप्रयन्तु वृषभस्तु युष्मान्यनावह
निविदधेत्तनूपाः सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासु देवो द्रविणं दधातु येते अर्यमानीतिनाभिम् येते अ
र्यमन्बहवो देवयाना पन्थानो राजन्दिव आचरन्ति तेभिर्नो अद्य पथिभिः सुगेभिः रक्षा च नो अधि च ब्रूहि देवः

अस्मेइन्द्राइतिहृदि अस्मेइन्द्राबृहस्पतिरयिन्धत्तंशतग्विनं अश्वावन्तंसहस्रिणम् बृहस्पतिर्नः वामस्कन्धे बृ
हस्पतिर्नःपरिपातुपश्चादुतोत्तरस्मादधरादघायोः इन्द्रःपुरस्तादुतमध्यतोनःसखासखिभ्योवरिवःकृणोतु
हिरण्यगर्भः दक्षिणस्कन्धे हिरण्यगर्भोयःप्राणतोउत्र्यापश्चित्रन्देवानाम् तरणिर्नेत्रयोः तरणिर्विश्वद
र्शतोज्योतिष्कृदसिसूर्य विश्वमाभासिरोचनम् दिवोरुक्मइतिशिरसि दिवोरुक्मउरुचक्षाउदेतिदूरेअ
र्थस्तरणिर्भ्राजमानः नूनंजनाःसूर्येणप्रसूता अयन्नर्थानिकृणवन्नपांसि ॥ ततोद्वितीयन्यासः ॐगणा
नान्त्वा हृदयायनमः कविंकवीनां शिरसेस्वाहा उपमश्रवस्तममितिशिखायैवषट् ज्येष्ठराजंब्रह्मणामि
तिकवचायहुं ब्रह्मणस्पतआनःशृण्वन्नितिनेत्राभ्यांवौषट् ऊतिभिःसीदसादनमित्यस्त्रायफट् तथा
पौराणिकोन्यासः ॐगांहृदयायनमः ॐगींशिरसेस्वाहा ॐगूंशिखायैवषट् ॐगैंकवचायहुं ॐगौंनेत्राभ्यांवौ
षट् ॐगःअस्त्रायफट् ॐतीर्थेस्नियमितादिधूपदीपौसंकल्प भद्रासनोपरिशुभ्रंदत्वाप्रतिमांस्थापयेत् देहवद्दे
वन्यासंकुर्यात् अस्मिन्नेप्राणाइतिजीवादानम् रक्तचन्दनकुङ्कुमकर्पूरसिन्दूरेणलिप्तम् मध्येकुम्भकुम्भोपरि
ताम्रपात्रेस्थापयेत् ततःषडङ्गंसंपाद्य ॐगायत्र्यैनमः इतिविः ३ ॐतत्पुरुषायविद्महेवक्रतुण्डायधीमहि त
न्नोदन्तीप्रचोदयात् ३ अद्यतावत् गणपते विनायकस्य एकदन्तस्य कृष्णपिङ्गलस्य गजाननस्य लम्बोद
रस्य बालचन्द्रस्य हेरम्बस्यविकटाननस्य वक्रतुण्डस्य आखुरथस्य विघ्नराजस्य सिद्धिसहितस्यगणेशस्य
तथागणपतेःकुमारस्य श्रियःसरस्वत्याः लक्ष्म्याः विश्वकर्मणः द्वारदेवतानां प्रजापतेर्ब्रह्मणोकलशा
देवतानां ब्रह्माविष्णुमहेश्वरदेवतानांचतुर्वेदेश्वरस्यमासपतेविष्णोः अग्नये ६ इन्द्रादीनांदशलोकपा

✻ विनायकायपाद्यंनमः २३ गणपतयेकुमारायपाद्यंनमः ९

कु॰च लानांआदित्यादीनामेकादशग्रहाणांसमस्तयागदेवतानांयथोक्तफलप्राप्त्यर्थंचतुर्थीव्रतोद्यापननिमित्तंग
थी॰उ॰ णेशपूजनंकलशपूजनंयागपूजनमर्चामहंकरिष्ये ॐकुरुष्व यवान्विकीर्य प्रयोजन्नेदत्वावाहनम् महान्त
द्वी ध्रुवाद्यौवित्यासनम् महागणपतइदमासनंनमः २३ गणपतेकुमारस्यइदमासनंनमः महागणपतये
पुष्पान्वःपूजयामि ॐआवाहय यवान्विकीर्य आवाहयाम्यहंदेवंगणेशंसुरपूजितं सदेवविघ्नहर्तारंस
र्वकामफलप्रदं ब्रह्माणीचैवब्रह्माणीपूज्यन्तेसर्वदेवताः बलिंपुष्पंचरूपंचैवधूपोयंप्रतिगृह्यतां गणनान्त्वा
इतिमन्त्रः शन्नोदेवी लाजाम्ब गणानान्त्वा हिरण्यवर्णेतिपाद्यम् महागणपतयेपाद्यंनमः शन्नोदेवीः आ
पन्तीरं सान्नधुभा आपोहिष्ठेति अर्घ्यम् महागणपतयेअर्घ्यंनमः विनायकइदंवोर्घ्यंनमः गणपतयेइदं
वअर्घ्यंनमः अग्नेरुक्ते शन्नआपइत्याचमनीयम् महागणपतयेआचमनीयंनमः उत्तिष्ठब्रह्मणस्पते इद
मापःसत्रस्नानम् पयोदधिइत्यादिमेकविंशतिस्नानानिदद्यात् देवपीठोपरिदेवान्स्थीन्पिहत्तर्पयेत् प्रत्य
ग्नेआरात्रिका गणानान्त्वाइतिमन्त्रगडुकम् ताम्रपात्रान्तरेदुग्धःजम्भोपरिस्थापयेत् दध्येअन्नेषेणसुलेप
नम् अर्घमायाद्य युवासुवासः महागणपतयेवासोनमः यतेअर्घमन् यज्ञोपवीतं अस्मेइन्द्र गन्धद्वारामि
तिचन्दनम् गणपत्यादिभ्यःसमालभनेगन्धोनमः २३ बृहस्पतिर्नः पुष्पवतीतिपुष्पम् महागणपते ग.
णपत्यादिभ्यःअर्घ्योनमः पुष्पंनमः सुगन्धीनिचपुष्पाणिगृह्णाणिविविधानिवै विनायकनमस्तुभ्यंसुरा
सुरसुपूजितम् विनायकायअर्घ्योनमःपुष्पंनमः २३ ततःप्रयोजन्नेतिसूक्तेनदेवस्यपुष्पपूजाकार्या
पूर्वे लम्बोदरायनमः आग्नेये गजाननायनमः दक्षिणेविकटायनमः नैरृते भीषणायनमः पश्चिमे
ननाय

विघ्नेशायनमः वायवे दीर्घनासिकायनमः उत्तरे गजराजायनमः ईशाने विश्वरूपायनमः अर्घ्यंनमः पु
ष्पंनमः हिरण्यगर्भाय आगन्ते धूरसीति धूपः महागणपतये ३ गणपत्यादिभ्यः धूपंपरिकल्पयामिन
मः गन्धिर्विस्म तेजोसीति रत्नदीपकं महागणपतये ३ गणपत्यादिभ्यः रत्नदीपंपरिकल्पयामिनमः चा
मरंनमः छत्रंनमः आदर्शंपरिकल्पयामिनमः दिवोनकमसावित्राणेतिमधुपर्कम् महागणपतयेकुमारा
य दधिमधुपर्कंनमोनैवेद्यंनिवेदयामिनमः हिरण्यगर्भः निषुसीदगणपतेकुसुमाञ्जलिंसमर्पयामिन
मः प्रदक्षिणत्रयानिच एकमूण्ड्यारवोसमन्त्रीणिदद्याद्विनायके चत्वारिकेशवेदद्याद्धिवस्यार्धप्रदक्षिणम्
अद्यदिने प्राज्ञेदेवीः एताभ्योदेवताभ्यः अर्घ्यपात्रंनमः आचमनीयंनमः पुनः प्राज्ञोदेवीः दक्षिणायेति
लहिरण्य गणानांत्वाइतिपुष्पं ॥ ततोग्निकर्म अग्निपरिसमूह्य पर्युक्ष्य परिषिच्यपरिस्तीर्य सावित्रा
णि महागणपतये ३ गणपतये कुमाराय श्रियै सरस्वत्यै समुक्तचतुर्थीव्रतोद्यापनदेवताभ्यः जुहोमि।
र्वयामि एवंप्रोक्षणम् आज्यभागान्ते गणानांत्वेतिमन्त्रेणसमिद्धोमसहस्राः निषुसीदगणपतेत्यादि
निषुसीदगणपतिहोमंकुर्यादघवैः तिलैः तत्पुरुषायमन्त्रेणचरुणाचयजेत्पुनः गणानांत्वेतिमन्त्रेणस
मिद्धोमः १०८ निषुसीदगणपतेत्यादिप्राज्ञोदेवीत्यन्तम् विनायकाय ३ इन्द्रापर्वतादिसर्वसूक्तकं
होमयेत् ततश्चरुहोमः ओंतत्पुरुषायविद्महे मन्त्रेण अन्नाहुति १०८ निषुसीदगणपति प्राज्ञोदेवीताव
अनेन त् विनायकाय ३ इन्द्रापर्वता सर्वसूक्तकं होमयेत् निषुसीदगणपतेइत्याज्येन १०८ सर्वसूक्तकं आज्ये
नहोमयेत् ततस्तर्पणम् आज्येनकूष्माण्डंहोमयेत् यद्ग्रयानाद् इतिचतुर्गृहीतेनआज्येनदद्यात्
ततोयवतिलहोमः इदंहविश्शतमभिघार्य अग्नयेस्वाहा इत्यादिस्वाहेतिहोमंवा अष्टधर्यायप्राज्ञोदेवी

कृ॰च
दी॰३

5

रिम्पूजनम् गणानान्त्वामन्त्रेण १०८ शाकलहोमं इन्द्रापर्वतादि सर्वमन्त्रकं ततस्तर्पणम् ग्रहाणां सूक्तानि यवतिल
होमयेत् तर्पणम् विष्णुपञ्चकम् रुद्रपञ्चकं गणपतिसूक्तं देवीपञ्चकं आज्येन होमयेत् स्वाममन्त्राणि ततः
ऋतन्तिष्ठ्यादि यत्तेहृद्भोदित्यन्तम् ततः नैवेद्यं इन्द्रभागमग्निं त्वेषास्यानवौ वैश्वानराय मनोज्योतिरिति।
समाप्तिं कृत्वा ततः प्रभाते चतुर्थ्यां स्नात्वा पूजामात्रं प्राग्वत्कुर्यात् वैश्वदेवादि नित्यकर्म नैवेद्यानि दत्त्वा चत्वान्तंकु
र्यात् आकाशमात्रे बलिः क्षेत्रेश्वरबलिः पुनः ब्राह्मणपूजनम् ॐ गायत्र्यै नमः इतित्रिः २ ॐ तत्पुरुषाये
त्यादि अद्य तावत् अग्निर्यविष्ठ इत्यादि पूजा कार्यम् चतुर्थीव्रतपनं अर्चामहं करिष्ये एवं दक्षिणान्तं पूजनं
कार्यम् ततो यागे शुक्लां संपाद्य ॐ गायत्र्यै नमः इतित्रि ॐ तत्पुरुषायेत्यादि २ अद्य तावत् विनायकस्य २२
महागणपतेः कुमारस्य इन्द्रादीनां दशलोकपालानां आदित्यादीनामेकादशानां ग्रहाणां समस्तयागदेवता
नाञ्चानमनः यथोक्तफलप्राप्त्यर्थं गणेशचतुर्थीव्रतोद्यापननिमित्तं गणेशपूजनयागपूजनमच्छिद्रमस्तु पूर्णं
मस्तु एवमस्तु एताभ्यो देवताभ्यः यवोदकं नमः उदकतर्पणं नमः आपन्नोस्मि अज्ञानाज्ज्ञानतो वापि यद्या
न्यूनाधिकं च यत् दासस्य मम दीनस्य क्षन्तव्यं गणनायक अज्ञानाज्ज्ञानदौर्बल्याद्द्वेषात्कालादि विस्मवात्
अस्य पूर्णेमृतं यन्मे भूयात्संपूर्णमद्य तत् गणाधिप गणाध्यक्ष उमापुत्रौघनाशन अनेन संपूर्णतां यातु त्वत्प्रसा
दाज्जगत्प्रभो विनायक नमस्तुभ्यमेकदन्ताय वै नमः नमः कृष्णपिंगलेशाय गजानन नमोस्तु ते लम्बोदर नमस्तुभ्यं
भालचन्द्राय वै नमः हेरम्बाय नमस्तुभ्यं नमो विकटनासिके वक्रतुण्ड नमस्तेस्तु आखुरथाय वै नमः विघ्नरा
जनमस्तुभ्यं गजराजाय वै नमः नमस्तु गणनाथाय नमस्ते चण्डविक्रमे गणेशाय नमस्तुभ्यं विघ्नान्तक नमो नमः
नमो मन्मथनाशाय भीमस्वामी नमोस्तु ते गाङ्गेयाय नमस्तुभ्यं गणेश्वर नमोस्तु ते गजानन नमोस्तुभ्यं स्कं

धारेनमोस्तुते गणाध्यक्षनमस्तेस्तु नमोविकटनासिके लम्बोदरनमस्तेस्तु महोत्कटनमोस्तुते जम्बुकायन
मस्तुभ्यं लोकेशायनमोनमः विघ्नकर्त्रे नमस्तुभ्यं हेरम्बायनमोनमः नायकायनमस्तेस्तु विघ्नेशायनमोन-
विरूपायनमस्तेस्तु घटोदरनमोनमः त्रिनेत्रायनमस्तुभ्यं वामनायनमोनमः लम्बोष्ठायनमस्तेस्तु एकदन्ता
यवैनमः लम्बोदरनमस्तेस्तु वरदानन्दधारिणे ईप्सितं देहि मे कामं फाल्गुणे प्राकरोद्भव विनायकव्रतोद्भूत
मनन्तफलदस्तु मे एकदन्तस्त्वथा चैत्रे पूजितः श्रद्धया मया त्वत्प्रसादाद्व्रतं पूर्णं भूयान्मे त्रिपुरान्तक वैशाखेह्ने
लम्पिङ्गस्त्वविधिवत्फलकाम्यया पूजितोसि मया भक्त्या देहि पूजाफलं मम गजाननस्त्वथा ज्येष्ठे पूजितोसि म
यात्र भो तुष्टोसि विधिवद्भक्त्या देहि पूजाफलं मम इत्यादि ततः कलशप्रतिमादानम् सावित्राणि आत्मनः या
थोक्तफलप्राप्त्यर्थं चतुर्थीव्रतोद्यापननिमित्तं विनायककलशं सहिरण्यसवाससंमानं ददानि २ प्रतिगृह्णा
मि एवंक्रमेण सर्वेषाम् प्रतिमा होत्रे प्रतिपादयेत् सावित्राणि आत्मनः यथोक्तफलप्राप्त्यर्थं गणेशप्रतिमां सहि
रण्यसवाससंमानं ददानि २ प्रतिगृह्णामि ततस्तर्पणम् ततो दध्यक्षततिलैरिक्षुमध्वाज्यमिश्रितैः तर्पयेद्देवे
देवऋषिपूर्वान्नर्षीन्क्रमात् आगनेनाद्देवर्षीन्दक्षिणाभिमुखः पितॄन् येचरन्ति सदामेरौ ब्रह्मणाधिष्ठिताः स्वराः
त्वमिमायान्तुते सर्वे चतुर्थ्युद्यापनद्वारे द्वादशीउद्यापनान्तरे लिखितं ततो ब्राह्मणानां दक्षिणां सम्पाद्य गंगणपतये
नमः इति त्रि ३ ओंतत्पुरुषायेत्यादि अद्यतावत् महागणपतये अच्छिद्रमस्तु पूर्णमस्तु एवमस्तु एताभ्यो देवता
भ्यः यवोदकं नमः उदकतर्पणं नमः उत्तिष्ठ ब्रह्मणस्पते इति गणेशचतुर्थीउद्यापनम् अथशुक्लाचतु
र्थीउद्यापनं लिख्यते अथशुक्लाच ॥ ॥ ॥

चं.ष.
३.

ॐ श्रीगणेशाय नमः अथ चन्द्रषष्ठीव्रतोद्यापनं लिख्यते ॐ अत्रादौ गोमयेन भूमिमुपलिप्य अष्टदलम्
तद्दिगणतः कुम्भषट्कं संस्थाप्य वेदवतद्द्वयं क्षेत्रपालद्वयं चन्दनेनलिखित्पञ्चाष्टपत्रंचधीमता गणेशाभूज
येन्मध्यादेशान्यो विनायकेश्विकम् ततः कुम्भंचयेत् पूजायन्त्राणि पितामहं गंगांचैवनन्दिरुद्रं वसिष्ठं चद्विजोत्त
म तेषांचैव कृतापूजा विधानेनपृथक्पृथक् तन्मध्ये चन्द्रसूर्यप्रतिमां संस्थाप्य पंचगव्येनभूमिप्रोक्षणम्
भद्रपाठादि प्रान्नोदेवीरित्यनेनम् ततः प्रधानेकलशे अग्नये ६ पनद्विस्त्तुः योरुद्रो त्र्यम्बकं वासुदेवायन-
मः ६ भवायदेवाय ६ अष्टदलेपुष्पं क्षिपेत् अग्नयेनमः वरुणाय नमः खड्गायनमः विस्रवे कृत्तिकायन-
मः कुमाराय नमः रुद्राय नमः चन्द्रमसे नमः मध्ये गणेशाय नमः शिवाय कृष्णाय नमः गायत्र्ये नमः पि
तामहाय नमः गङ्गायनमः नन्दिने नमः रुद्राय वसिष्ठाय ॐ ह्रीं श्रीं ह्रूं हूं ह्रूं ह्रूं तात्पायनये सर्वविघ्नाप्या
यनहेतवे सर्वतेजोग्निज्वालावृत्तकद्रीमः सः आरोग्यमैश्वर्यं वर्धय स्वाहा नमः इतिचन्द्रमंत्रेण मध्ये पुष्पं
क्षिपेत् मध्ये गणनानाम्ना चित्रन्देवानां ह्रां ह्रीं सः सूर्याय नमः ॐ धंधरणी सुताय नमः इश्वरोङ्गवायन-
ॐ ह्लृं बुधाय नमः गूं जीवाय नमः श्रीं भृगुसुताय नमः शां शौराय नमः इतिकुम्भषट्कं अर्चा चन्द्रमग्नि रो
हिणीसहिताय चन्द्रमसे नमः छायासुताय भास्कराय नमः नारदाय अम्बरीषाय नमः इन्द्राणीसहिता
य प्रह्लादाय नमः गणेशाय नमः योरुद्रो वषट्कविघ्न गायत्र्ये नमः तत्सवितुः ब्रह्मादेवानां इमंमेगङ्गे
यमुने सरस्वति शुतुद्रिस्तोमं सचताय रुद्रिया अशिमिरियामरुद्धयेविनस्त्वयाजीकीयेशुरुद्राय त्र्यम्बकमया
त्र्यम्बकं रुद्रास्त्वुतने ६ ईशानानांना नन्दिरुद्राय नमस्ते रुद्रोस्त्र अग्निरुद्राय अग्निऋषिः नारदाय नमोस्त्र
स्वसर्पं शेषाय न ब्रह्मादेवानां कलशे मदस्मनो भक्तिगणाय इतिकुम्भषट्कं नमः ६ ततश्चतुर्वेदे पुष्पं

अग्निमीडे इषेत्वोर्जे अग्न आयाहि शन्नोदेवी इन्द्रापर्वता ऐन्द्राग्नं तावत् सावित्राणि इति मधुपर्कम् अर्चैत
त्वा यजमानमानीय देवन्यासं कुर्यात् पुरुषसूक्तेन चन्द्रसूर्येणन्यासं कुर्यात् स्वादोरभक्त वामकरे अ
ग्नःप्रागाद्दक्षिणकरे आप्यायस्व सोम वामपादे शन्नोभव दक्षिणपादे इमेमापितरा वामजानौ अग्निर्नेमम
दक्षिणजानौ इषिरेणाते ऊर्वौ सोमो राजन्मृडा गुह्ये त्वं हि नस्तन्वः नाभौ मा हृद्दरेण हृदि अपत्यारक्षतु
कण्ठे येनइन्द्रः पितरौ वामबाहौ त्वं सोमपितृभिः सं दक्षिणबाहौ त्रातारं दिवाअधिवोचमुखे त्वन्नसो
मो विश्वतो नेत्रे नवोनवो भवति शिरसि त्वं सोमस्मिसत्पति अस्त्रायफट् ओं हृदयायनमः नमः शिरसे
वषट् शिखा कवचायहुं नेत्राभ्यां वौषट् अस्त्राय ओं हृदयायनमः क्रां शिरसे ह्रीं ज्वलितशिखायै सः कं
सूर्याय नेत्राभ्यां नमः अस्त्रायफट् तीर्थस्नेयं दीपधूपः अपसव्येन नमः पितृभ्यः धूपोनमः दीपोन
सव्येन अक्षिनी जीवादानम् देवन्यासं कुर्यात् एकाग्रामारभेत ओं भूः पुरुषं आ तु गायत्रीनमः तु तत्
पुरुषाय तु निशाकराय विद्महे तु भास्कराय विद्महे तु अद्य तावत् गणपतये अग्नये ६ वासुदेव
भवदेव विनायक क्रां क्रीं सः सूर्य अनेक इन्द्रादीनां ऊर्मे सूर्याय धरणीसुताय इश्वरोद्भवाय बुधा
य जीवाय भृगुसुताय सौराय विश्वे चन्द्रमसे अमृतकलाधारिणः नित्यानन्दस्य उमासहित
स्य परमेश्वरजटामुकुटवासिनः तथा अग्नेर्वरुणस्य खड्गस्य विष्णो कृत्तिकाया कुमारस्य रुद्रस्य कश्य
पस्य भृगु चन्द्रमसः गणेशस्य शिवस्य कालस्य गायत्र्याः पितामहस्य गंगायाः नन्दिने रुद्रस्य वशिष्ठस्य
अनिरुद्धस्य नारदस्य शेषस्य कश्यपस्य भृङ्गिगणस्य तथा क्रां क्रीं सः सूर्यस्य सपरिवारस्य ज्योतिरू
पस्य सप्ताश्वस्य एकाश्वस्य छायासहितस्य भास्करस्य यमस्य रोहिणीसहितस्य चन्द्रमसः नारदस्य

चं॰ ष॰
श्री ३

अम्बरीषस्य इन्द्राणीसहितस्य प्रह्लादस्य गणेशस्य रेवतीसहितस्य उडुपते ह्लादासहितस्य रजनीपतेः
तारासहितस्य निशाकरस्य चन्द्रिकासहितस्य ज्योत्स्नापते रमणीसहितस्य औषधीपते रामासहितस्य
त्रैवात्रिकस्य अमृतासहितस्य स्वधांशोः यशोवतीसहितस्य किरणस्य शुभ्रासहितस्य अब्जस्य सुहासि
तासहितस्य शशाङ्कस्य कृत्तिकासहितस्य कलानिधेः परमामृतासहितस्य हृषीकसंकलस्य नयोद
शनामानि इन्द्रादीनां दशलोकपालानां आदित्यादीनामेकादशग्रहाणां तथा रोहितस्य चन्द्रमसः
तथा रुद्रस्य सानुचरस्य पृथिव्या अग्ने ऋग्वेदस्य ब्रह्मणश्छन्दांसि इत्यादि हेरुकादीनां वटुकादीनां
आत्मनो चन्दनषष्ठीव्रतोद्यापननिमित्तं कलशपूजनं यागपूजनं चन्द्रपूजनं विष्णुपूजनं अर्चामहं करि
ष्ये ॐ कुरुष्व एवमेव षष्ठ्यासनं दद्यात् अथ आवाहनं आवाहयाम्यहं देवं गणेशं अथ कलशं तथा
दशलोकपालं अथ चन्द्रस्य आवाहयाम्यहं देवं चन्द्रं नक्षत्र यानेधामानि आवाहया भानुं सर्वं आकु
लेन आवाहया ईश्वरं यो रुद्रो आवाहयाम्यहं देवं विष्णुर्वै वि प्रतद्विष्णु आवाहयाम्यहं देवं ब्रह्माणं क
मलासनम् हंसयानविमानस्थं कमण्डलुकरशोभितं रक्तवर्णं ब्रह्मा जज्ञानं आवाहयिष्यामि यवा
न्विकीर्य पाद्यार्घ्यमुदकं नमः शन्नो देवीः एतावानस्य हिरण्यवर्णाः अपामसोम इति पाद्यम् ऋज
नीतिनो वरुणो मित्रो नयतु विद्वान् अर्यमा देवैः सजोषाः विल्वे चन्द्रमसे अमृतकलाधारिणीति पाद्यम्
त्रिपादूर्ध्व आपो हि ष्ठेति शन्नो भव हृदे त्वं सोमासि सत्पतिः इत्यर्घ्यम् तस्माद्विरा शन्न आपः इमेमावि
ता इत्याचमनीयम् यत्पुरुषेण इदमापः अग्निर्नमामसि इति मन्त्रस्नानीयम् ततः पयो दधि एकवि
शति स्नानानि अम्बुनाथ्य सार्धं षोडश स्नानानि पुरुषसूक्तेन चन्द्रसूक्तेन स्नानानि दद्यात् ततः ब्रह्मा

विष्णु सनकादय: पितृभ्य: तर्पणम् तद्विष्णु यातेधामानि मन्त्रगुड्कं प्रत्यग्ने तंत्वावन्दे आरात्रिकं तावा
वस्त्र इतद्रूद्भ नेत्रस्पर्शनं रथेअक्षेषु त्वत्तु: आप्यायस्व सन्तेपयांसि नवोनवो अनुलेपनम् तेयज्ञं त्वा
सो इत्यादीवतेमनसाहुतस्य त्वंसोमो विश्वतोवयो वस्त्रं तस्माद्यज्ञात् सोमोराजा मृडू यज्ञोपवीत गन्ध
द्वारं त्वंहिनस्त्वंसोम त्वंचसोममनुवशोवतो नमस्ताग्न इत्यं पत्नी वनस्पति इतिचन्दनम् तस्माद्श्वा
पुष्पवती रिहूद्रेनसख्या उडुत्तमं वरुणपुष्पं पुरुषसूक्तेन चंद्रसूक्तेनपुष्पाणि इन्द्रायनम: पूर्वे अ
मारायनम: आग्नेये कृत्तिकायनम: यमायनम: खड्गायनम: नैरृते विसवेनम: वरुणायनम: मृगा
ङ्कायनम: वायवेनम: ताराभ्योनम: वैश्रवणायनम: सोमाय महेशायनम: चेन्द्रायनम: ब्रह्मणे
अत्रिपुत्रायनम: अनंतायनम: समुद्रायनम: अब्जायनम: आकाशायनम: अर्तंबलायनम: उदयाच
लायनम: अनित्यायनम: नित्यायनम: अमृतकलाधारिणेनम: जटामुकुटवासिनेनम: जगदाप्या
यनकर्त्रेनम: नित्यानंदायनम: ऽमृतमयायनम: चन्द्रमसेनम: तारापतयेनम: आनंदाह्लादिनेनम:
पूर्णासहितसोमत्यादिसम्पूज्या: पूर्णासहितस्यविष्णो: ईष्यासहितस्यसुधांशो: सुमनासहितस्य शुभ्रां
शो प्रीतिसहितस्य औषधी तुष्टिकरीसहितस्य निशापते: धृतिसहितस्य अत्रेर्नस्य हृष्टिसहितस्य
सोमस्य सौम्यासहितस्य मृगांकस्य मरीचिसहितस्यकलानिधे अंशुमालिनीसहितस्य द्विजराजस्य
प्राग्भिनीसहितस्य क्षपाकरस्य शुक्लपक्षे मृगशिरासहितस्यमृगांकस्य पुष्यासहितस्यसुधांशो:
मघासहितस्यइन्दो: पूर्वाफाल्गुनीसहितस्य उडुदवाग्यो चित्रासहितस्य चंद्रमस: विशाखासा
हितस्य औषधीपति: ज्येष्ठासहितस्य निशाकरस्य पूर्वाषाढासहितस्य श्रवणासहितस्यमृगांक

च॰ष
७० स्य पूर्वभद्रपदासहितस्य हिमराजस्य अश्विनीसहितस्य शशिधरस्य कृत्तिकासहितस्य कलानिधे
चन्द्रमसे नमः उडुपते रजनीशाय निशाकराय ज्योत्स्नाय ओषधीनाथाय जैवात्रिकाय स्वर्धांशाय
अब्जाय शशाङ्काय कलानिधे शोभरूपिणे अमृताद्रवे शुक्लदेवाय नित्यामृताय सूरये सूर्याय नमः
दिवाकराय विवस्वते भर्गाय वरुणाय महेन्द्राय आदित्याय पूषणान्ताय समन्तगाय अशोकाय विशो-
काय नन्दीशाय पुष्टिवर्धनाय सौवर्णचूडाय शंवराय मणिहृदये यमाय मार्तण्डाय रवे भास्करा-
निष्कलरूपाय ह्रां ह्रीं सः सूर्याय अर्घो नमः पुष्पं नमः यत्पुरुषेति धूरसीति धूपः आपत्यादृत्त्वं धूपं ब्र-
ह्मणो तेजोसीति येनइन्द्रपि रत्नदीपं हिरण्य चन्द्रमा मनसो त्वं सोम पितृभि मात्रा मधुपर्कं सन्तूपया-
सीति मधुपर्कं नाभ्या आसीत् मातारो देवा कुसुमाञ्जलिं समस्यासन्यापि त्वं सोमो विश्वतो शन्नो देवीः
अपोशानं आचमनीयं पुनश्चैतो दक्षिणायै कलशा विश्वश्री चन्द्रप्रीत्या सूर्यप्रीत्या तिलाम्भसा पु-
ष्पं पूषाय पूषा त्वमनसाप्रीतिर्वृद्धिकरी स्मृताः धृति वृद्धिकरी सौम्या मरीचिरंशुमालिनी शशिनी मो-
हिनी लक्ष्मी छाया संपूर्णमण्डला अमृता षोडशी चैव कलानां कलशोर्चयेत् पुष्पं क्षिपेत् ॥ ततोऽग्नि-
कर्म पात्रे तिलाइत्यादि गणपतेरित्यादि अग्नये ६ त्रयोदश पूषादि १३ कलाः १६ इन्द्रादिभ्यः चन्द्र-
नक्षत्रव्रतोद्यापननिमित्तं जुहुं आज्यभागान्तं समिद्धोमः प्रधानं यातेधामानि २८ निषुसीदइत्यादि
वषट्कृतावत् प्रधानं इन्द्रापर्वता ऐन्द्राग्नं तावत् आज्यहोमः नवोनवोभवति उदुत्तमं वरुण २८ नि-
षुसीदगणपते प्रधानं इन्द्रापर्वतादि ऐन्द्राग्नं तावत् ततः आज्यहोमः एवावन्द उदुत्तमं २८ निषु-
सीदगणपते प्रधानं इन्द्रापर्वतादि ऐन्द्राग्नं तावत् तर्पणम् कूष्माण्डहोमं ५ तेजो अग्ने विश्वपंचकं

तर्पणम् यवतिलहोमः निवृत्तीदग्ध वर्षवृद्धेप्रधानानि इन्द्रापर्वतादि ऐन्द्राग्नेनावत् तर्पणं रुद्रपंच
कं देवीपञ्चकं मोक्षधनगणः इत्योत्रमन्त्रः अनन्तनिष्ठ्यादि नैवेद्यम् वैश्वानराय उपस्थानं घोषश्रावयोः
वाश्वरूपणा तर्पणं तर्पणपूजान्तेनावत् शोपरक्तं अग्निर्विहृब्राह्मणपूजनं दक्षिणायदद्यात् ओंभूः
भुवः स्वर्विसर्जयामि नमः ३ मृगशिरा १२ भुवाय १२ कलाः १६ अच्छिद्रसम्पूर्णमस्तु एवमस्तु यवोद
कं नमः उदकतर्पणं नमः आपन्नोऽस्मि ओं नमस्तुभ्यं प्राणाकाय विश्वव्यापिने हेतवे चन्द्राय रात्रिपतये
प्राणाङ्कमरणाय च इदं देवपूज्यदेहाय रूपसंधारणाय च अहाधीशाय कमलप्रतिष्ठोभनमूर्तये विधि
समुद्रजाताय श्रीमहाय षष्ठे नमः पूजितोऽसि मया भक्त्या षष्ठीसोमं तन्मण्डले शुद्धस्फटिकसंकाशा शा
रीरस्तु ततो व्यक्तक आयुरारोग्यमैश्वर्यं वृद्धिमप्युधिगच्छति नस्यन वाधते मृत्युर्न विघ्नं च दुःखितः ऐः
सूर्यसर्वदेवाशुहा आरोग्य सर्वदेवतः तत्याक्षादिभियन्तस्थनाकालं मृत्युमाचरेत् सर्वपापविनिर्मुक्तो स
र्वदोषविवर्जिताः एतादेवास्तु मेसारमित्याज्ञाप्य पितामहः सत्यसत्यं पुनः सत्यं यस्सर्ववृतमाचरेत् आ
नन्दलालायाकरणं तारकाकाशाकपरम् अथसूर्यस्य पूजनम् त्वमेव सम्प्रधाभूता छन्दोरूपेण हस्कर या
स्मात्कामयते लोकास्सनः आप्यसनातनः विश्वायविश्वरूपायविश्वधाम्नेस्वयम्भुवे अनन्तायनमोधात्रे ऋ
क्सामयजुषात्मने मोहान्धकारनरकार्णवपातिविश्वयद्दृश्चिमभिः प्रसभसमुद्धरसित्वमेकः तन्मन्यभास
नरकादिरतिप्रसिद्धः सर्वोद्यवर्तिपद्मीश्वरमापदानः आह्वानं नमोब्रह्मणे सावित्राणि आत्मनो चे
दनषष्ठीव्रतोद्यापननिमित्तं इमं नन्दिकलशं एवं षट्फलपंदद्दानि सूर्यचन्द्रमप्रतिमां कुम्भसहितं स
हिरण्यं दद्दानि कइदं ततःतर्पणम् ततोदधिदत्तेति एतादेवता ब्राह्मणपूजनं अच्छिद्रसंपूर्णमस्तु

चं.ष. पूर्णाहुतिं दद्यात् अग्निं विसृज्य वैश्वदेवादि नित्यकर्म कलशोदकं सम्पाद्य गायत्र्यै नमः इत्यादि सर्वं पठेत्
उ. अच्छिद्रं यवोदकं उदकतर्पणम् नमो ब्रह्मणे मन्त्रार्थाः इत्यादि इति चन्दनषष्ठीव्रतोद्यापनं सम्पूर्णम् समाप्तं

ॐ श्रीगणाधिपतये नमः अथ बुधाष्टमीव्रतोद्यापनम् ॐ बुधाष्टमीव्रतं पुण्यं पूजनीयं प्रयत्नतः उ
द्यापनविधिं चास्याः प्रवक्ष्यामि समासतः प्रादौ नवग्रहमण्डलम् दक्षिणतः अष्टदलपद्मं तन्मध्ये बु
धस्वरूपप्रतिमां वेदचतुष्टयं पञ्चगव्येन भूमिशोधनम् भद्रपाठादि शन्नो देवीरित्यन्तम् अग्नये नमः
विष्णोर्नुकं वीर्याणि इदं विष्णुः विष्णो रराटमसि तद्विष्णोः प्रतद्विष्णोः वषट्ते यो रुद्रो अग्नौ इमाना
त्वा त्र्यम्बकं ततो ष्टकलशेन बुधसूक्तेन एक एक मन्त्रानु पुष्पं क्षिपेत् तेषु नेत्रनामधेयं अच्युताय
पुष्पं क्षिपेत् इन्द्रापर्वता सावित्राणि अर्चन्तस्त्वा प्रादौ न्यासकर्म ॐ आब्रह्मन्ब्रह्मणोभिरस्मि
ब्रह्माणिमेमातन्यास् ललाटे ब्रह्मजज्ञानं नेत्रयोः ब्रह्मणस्पतिरिति नासिकायां ब्रह्मणस्पते
त्वमस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व विश्वं तद्भद्रं यदवन्ति देवा बृहद्वदेम विदथे सुवीराः ब्राह्म
णोस्य मुखमासीत् मुखे ब्रह्मा देवानां पदवीः कवीनां कण्ठे ब्रह्मणाग्निः संविदानो रक्षोहा बा
धतामितः अमीवा युक्तेन गर्भं दुर्नामा योनिमाशये बाह्वोः चन्द्रमा मनसो जातः हृदये नाभ्या आसी
दन्तरिक्षं नाभौ सोमानं स्वरणं कृणुहि जान्वोः मानस्तोके तनये जङ्घयोः त्वं सोमासि सत्पति
पादयोः इयं विसृष्टिर्यत आबभूव यदेवादध्ये यदि वा न योः अस्याध्यक्षः परमे व्योमन्सो अङ्ग वेद

यद्विद्वान्नवेद यद्देवादेवमितिद्विग्वन्धनम् यद्देवाअधःसलिलेसुसंरब्धाअतिष्ठत अत्रावोनृत्यतामि
वतीव्रोरेणुरस्यायत अङ्गादङ्गाल्लोम्नः ततोद्वितीयन्यासः त्रीणिपदाविचक्रमे पादे तद्विप्रासोवि
पण्यवो जङ्घयोः इदंविष्णुर्विचक्रमेत्रे जान्वोः तद्विष्णोः नाभौ यस्मादन्योनपरोस्तिजातो हृदि
अतोदेवाअवन्तुनो द्विबाह्वोः येनद्यौरुग्रा कण्ठे ओषमिन्मुखे ओषमित्पृथिवीमहंजङ्घनानीहवेह
वा कुविन्मेसस्यपामिति भद्रङ्कर्णेभिरिति कर्णयोः देवानांभद्रासुमति नासिकायां भगएवेति नेत्रयोः
भगएवभगवाअस्तुदेवास्तेनवयंभगवन्तस्याम तन्त्वाभगसर्वइज्जोहवीति सनोभगपुरएताभवेह विश्वो
रराटमसि ललाटे हिरण्यगर्भः शिरसि युञ्जतेमनउत बुद्ध्यंचमनसास्मरेत् ततोरुद्रन्यासः यातेरु
द्रशिवातनूः शिरसि असंख्याताः ललाटे येनीलग्रीवा नेत्रयोः त्र्यम्बकं नासिकायां अवतत्यधन
स्त्वंमुखे येनील-शर्वाअधःकण्ठे उभाभ्यामुततेनमः बाहुभ्यां येतीर्थानिप्रचरन्ति हस्तयोः नमोवः
किरिकेभ्यो हृदये द्रापेअन्धसस्पते गुह्ये अग्निर्मूर्धादि वृषणयोः येवनेषुशिपिञ्जरा जङ्घयोः येपथी
नांपथिरक्षपादयोः अध्यवोचदधिकवचे येचेमरुद्राअभितो दिग्बन्धः नमोअस्तुनीलग्रीवाय
विदिक्षु पुरुषसूक्तेनन्यासंकृत्वा ततः सूर्यन्यासंकार्यं उदुत्यञ्जातवेदसमिति शिरसि अपत्येतार
वोयथा ललाटे अदृश्रमस्यकेतवो नेत्रयोः तरणिर्विश्वदर्शतो कर्णयोः प्रत्यङ्देवानां विशः नासिका
यां येनापावकचक्षसा मुखे विद्यामेषिरजस्पृथ्वहामि कण्ठे सप्तत्वाहरितोरथे बाह्वोः उद्वयन्तम
सस्परि हृदि उद्यन्नद्यमित्रमहः नाभौ शुकेषुमेहरिमाणं गुह्ये उदगादयमादित्यो लिङ्गे ममेतिद्विष्मो
धमहसा ऊर्वोः उद्यन्नद्यजानो उद्यन्नत्वापादौ ॥ तीर्थस्नानं धूपदीपःसंकल्पपूर्वाष्टमीव्रतो॥

बु॰मी याघनविमित्तं धूपोनमः दीपोनमः अपसव्येन पितृतर्पणम् सव्येन संवःसृजामिहृद अश्विनोरुत्तिजी
उ॰ वादानम् देवस्यन्यासकर्मकुर्यात् देहवत् जीवादानप्रतिष्ठाचयथात्मानं समाचरेत् एवंन्यासविधिंकृत्वा
ततःकर्मसमारभेत् यत्नम्रात्नाचकर्तव्यावेदरत्नासमन्विता धोधयेद्भूमिपादौवफचगवेनमत्रयेन् आदौ
मण्डलमालिख्यफचरंगैवशोभनम् अष्टास्वेदेवताश्रुमध्येवपुरुषोत्तमः गोविन्दकर्णिकायात प्राच्या
मच्युतएवच आग्नेय्यामाग्निस्थनन्दचन्द्रोदक्षिणदिग्दले नैरृत्यामिन्द्रराजानंमिथिलापश्चिमेदले वायव्या
मूर्मिलाख्यांचकौबेर्यांप्रपामलतथा ऐशान्यांधर्मराजानंकारयेन्मानसोत्थिनी जीवादानप्रतिष्ठाचयथात्मा
नंसमाचरेत् ततोप्युक्तसम्पाद्य ॐभूःपुरुषमावाहयामि ॐ गायत्र्यैनमः ॐ तत्पुरुषायविद्महे ॐ तन्महे
शायविद्महे ॐ नमोस्त्वनन्ताय ॐ सर्वविष्णुगायत्रीपठनीया ॐ रुद्ररूपायविद्महेरुद्रात्मनायधीमहि त
न्नोरुद्रःप्रचोदयात् ॐ भास्करायविद्महे ॐ अथतावत् महागणपते क्षेत्रपते अग्नेः ॐ वासुदेवस्येद
न्यादि तथा अच्युतस्य रुद्रस्य चन्द्रमसः इन्द्रराजस्य ऊर्मिलस्य मिथिलस्य प्रपामलस्य धर्मराजस्य
मध्येविष्णोः पुरुषस्य इन्द्रादीनां पुष्पाद्यमीत्वनोद्यापननिमित्तं आत्मनोवाच्छनः पुष्पयागदेवतानां वि
ष्णुपूजनं रुद्रपूजनं यागपूजनमर्चामहेकरिष्ये पुरुषएवेदं तद्विष्णोः प्रविष्णवे ध्रुवाद्यौरित्यासनं
विष्णोपुरुषस्यसपरिवारस्य इदमासनंनमः गणपतेरित्यादि विष्णोरुधाय तांपूजयामि ॐ पूजयस्व
हस्वशीर्षा युञ्जतेमन तदस्यप्रिया आवाहयिष्यामि ततआवाहनम् ॐआगच्छपुरुषरूपत्वमध्येम
र्वग्रहात्मक देवतानामिदंसर्वेपूज्याविष्णोनमोस्तुते आवाहयाम्यमरश्रेष्ठ आवाहयाम्यहंदेवंविष्णुं
वैविश्वरूपिणम् १ भगवन्पुण्डरीकाक्ष प्राणायामं शान्तोदेवी लाजाश्च तत्तीरसमाप्तुकंसर्वोषा।

१०

धिसमन्वितं सर्वतीर्थैर्हृतैस्तोयैः स्नानं मे प्रतिगृह्यताम् भगवन्नः पाद्यम् एतावानस्य प्रनाहिरन्तो वितिपाद्यं हिर
ण्यवर्णामिति पाद्यं भगवते पुरुषोत्तमाय गोविन्दाय पाद्यं नमः अच्युताय बुधाय चन्द्रमसे कुरुराजाय मि
थिलाय ऊर्मिलाय पृणामलाय धर्मराजाय समस्तयागदेवताभ्यः पाद्यं नमः ओषधिनिवासस्थेन पुनः श्रग्नोदेवी
ग्रायः क्षीरं क्षीरोदार्णवसम्भूतम् अत्रिनेत्रसमुद्भव गृह्याणार्घ्यं मया दत्तं रोहिणीसहितो हरे भगवन्नः पाद्य
त्रिपादूर्ध्व नृसनोद्यति दिवो वा विष्णो नमस्तोताः आपो हि ष्ठेति चार्घ्यमि भगवन्पुरुषोत्तम इदं वः अर्घ्यं न
अच्युत इदं वो अर्घ्यं नमः बुधः चन्द्रमसः कुरुराज मिथिल ऊर्मिल पृणामल धर्मराज इदं समस्तयागदेवता इद
वः अर्घ्यं नमः तस्माद्विराड् प्राजआपः त्रिलोकमालिपयतनयतो भवनानि विश्वरूपो इन्द्रस्य युज्यः सखा वि
ष्णोः शुक्रमसि आचमनीयम् सर्वौषधिसमायुक्तं सर्वमन्त्रसमन्वितम् विश्वेबुधाय आचमनीयं नमः यस्य
हवेन चदमायः यः सूर्यायवेदसीनवीयसे हुमजनाय विश्वेदेवा दाशति योजानमस्य महतो महीश्रवस्तो इत्य
वोभिर्युञ्यचिकित्सासत् याजोपयथः प्रथमजा भगवन्पुरुषोत्तममन्त्रस्नानं गृह्याणनमः ततः पयोदधिघृत
पञ्चविंशतिस्नानानि दद्यात् दिवो वा विष्णमन्त्रेण देवं स्नापयेत् दिवो वा विष्णउत वा पृथिव्या महो
वा विष्णउरोरन्तरिक्षात् हस्तौ पृणस्व बहुभिर्वसव्यैरा प्रयच्छ दक्षिणादोतसव्यात् तिलोसि तिलैस्स्नानं
तिलोसि सोमदेवत्यो गोसवो देवनिर्मितः प्रत्नमद्भिः पितृंल्लोकान् पृणाह्यायाहि नमः स्वधा यवोसि यवैःस्नानं
यवोसि यावयास्मद्द्वेषो यावयारातीः पितृषदनत्वालोकमस्तृणामि वहवत्येतिमन्त्रेण स्नापयेत् धवाम्बुणि
यदुक्तं तस्पदरस्यामवायप्रमस्यज्ञ विप्रोगत्योग्नितिस्वहम् अनुमितमः शरणकुम्भं नमेयमृतयाकंपचव इदवि
ष्णुरिति च वैस्नानं शृङ्गिः रसेन च इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् समूळ्हमस्य पांसुरे पञ्चगव्येन पञ्चभिर्मं

बुधा
ष्टमी
३

त्रैः तत्सवितुः गन्धद्वारां आप्यायस्व दधिक्राव्णो तेजोसि समुद्राद्धूर्मि गन्धद्वारां गोमयेन पंचामृतेन स्नात
था पंचभिर्मंत्रैः पयः पृथिव्यां दधिक्राव्णो घृतवती मधुवात पार्थिवाभिः पञ्चकुष्टीरेण विलोमराटमन्त्रेण
स्नानं जातीफलेनच विलोमराटमसि विलोमगर्भेस्यो विलोसृग्भिवि सोद्धुंवोसि वेलवमसि विसवेत्वा अ
तन्नमीमदमिति हरीतकीस्नानं अतन्नमीमदन्तह्यव प्रियाअहृषत अस्तोषत स्वभानवो विप्रा नविष्ठया मती
योजान्विन्द्रते हरी योविश्वचक्षुरुत इति स्नानं बिभीतकैः योविश्वचक्षुरुत विश्वतो मुखो विश्वतो हस्त उत
विश्वतस्पात् संबाहुभ्यां नमते संपतत्रैर्द्यावापृथिवी जनयन्देवः याओषधयः सर्वौषधीभिः याओषधयः प्र कः
थमजा देवेभ्यस्त्रियुगं पुरा मनैनु बभ्रूणामहं शतं धामानि सप्तच उष्णमांसीहरिद्रे द्वे सुराणीलेय संपकम्
वचा रक्तचन्दनं मुस्ता च सर्वौषधिगणः स्मृतः ततः शुद्धोदकस्नानम् शुद्धवत्या ऋचा इमोन्विन्द्रस्तवाम शुद्ध
शुद्धेन साम्ना शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु इदं कर्पूरसंयुक्तं वरुणं वरिष्ठाद्रसम् वरुणं विशिष्टा
दसम्भवामितं ह्वयामहे पवित्रं देवबद्धोपेरघन्वां सारवन्तरम् इमम्मे गङ्गे इति मन्त्रेणानुष्ठानोयाभिषेचनम् इ
मम्मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्णिया असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या
सुषोमया समुद्राद्धूर्मिरिति च स्नानं सप्तभिरण्वैः पयोदधिघृतैरेकविंशतिस्नानं ५५ अनुनाप्यय सतीषो
डशस्नानं बुधसूक्तेन पुरुषसूक्तेन लक्ष्मीसूक्तेन शिवसंकल्पम् अष्टस्नाना बुधस्य स्नानदेयम् ॥
देवर्षिपितृतर्पणं इदं विष्णु मंत्रगडुकम् प्रत्यग्रे आरात्रिका नावांबास्तनैव स्पर्शनम् एवं स्नानं नदस्व प्रिय
ध्रुवायोरिन्यासनम् रथे अग्ने देवेषु रथे अग्ने देवेषु त्वगनुलेपनम् देवस्नानमिति प्रोक्तं कर्मसिद्धिप्रदायकम् ॐ
कुमागुरुकर्पूरश्रीखण्डं बिल्वकं तथा एकगन्धप्रवर्तिन्नियीयनाप्राप्तिनन्दनः स्वानुलेपनम् बुधदेवता

ॐ कृष्णं वन्दनामलिमां प्रतिमां मध्ये कर्णिकायां कृष्णकर्म्मोपविस्थापयेत् तं यज्ञं बर्हिषि श्रीणिपदा युवा
सुवासः पीतवासा परिवीतस्य दिव्यवस्त्रपरिहृतः नानाच्छादनविस्तीर्णो गोविन्दः प्रीयतां मम वासो नमः
तस्माद्यज्ञात् तद्विप्रासो विपन्यवो यज्ञोपवीतं यज्ञोपवीतमाख्यातं मुनिभिर्नवदैवतम् होमकार्येसु
जं वापि उपवीतं प्रगृह्यताम् तस्माद्यज्ञात् गन्धद्वारेति चन्दनं जगदानन्दजननं यस्सर्वे गुनयो विदुः तद्ग
न्धग्रहणं चन्दनं प्रतिगृह्यतां भगवते पुरुषोत्तमाय गोविन्दाय अच्युताय बुधाय चन्द्रमसे इन्दुराजाय मि
थिलाये ऊर्मिलाये पद्मामलाये धर्मराजाय समस्तयागदेवताभ्यः गणपत्यादि समालभन्तु गन्धो नमः
इन्द्रादिभ्यः अनन्तादिभ्यः देवाधिपतिः समालभन्तु गन्धो नमः तस्मादश्वा अजायन्त पुष्पवतीति पुष्पं प
यासर्वकामप्रदानानस्याति सुरालयम् पुष्पाण्येतानि तुल्यानि शुभानि अहं गायएण तुलसीकाञ्चनपत्रीचजाती
चंपकमालती मन्दारकुन्दपुष्पैस्तु गोविन्दः प्रीयतां मम भगवते अच्युताय बुधाय चन्द्रमसे इन्दुराजाय
मिथिलाये ऊर्मिलाये पद्मामलाये धर्मराजाय अर्घो नमः पुष्पं नमः महागणपत्येत्यादि समस्तयाग
देवताभ्यः अर्घो नमः पुष्पं नमः पुरुषसूक्तेन लक्ष्मीसूक्तेन शिवसंकल्पेन असंख्याता प्रतिमा पुष्प
पूजा कार्या दिक्पालपुष्पम् एवं नारायणायेत्यादि यत्पुरुषं व्य वसवस्त्वा धूप धूरसीति दीप अगुरु
नलदमांसी च गुग्गुलं च मृगमदः नानागन्धैश्च धूपैश्च सोमजः प्रीयतां मम यद्भक्त्या सदसस्पतेः सुगन्धाढ्यं सका
रकं दैवकार्यादि सर्वं धूपोयं प्रतिगृह्यतां ब्राह्मणो तेजोसीति अग्निर्ज्योति रत्नदीपकं गे अग्निर्ज्यो
तिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः सूर्यः अग्निर्ज्योति रविर्ज्योति चन्द्रज्योतिस्तथै
व च दिव्यज्योति प्राणिज्योतिः प्रीयतां शशिनन्दनः यज्ज्योतिः परमं लोके तमो नाशनि विनाशनम् सदीपा

बु॰मी
बु॰

देवरूपेण दीयोयं प्रतिगृह्यताम् पुरुषोत्तमायेत्यादि गणपतयेत्यादि समस्तयागदेवताभ्यः रत्नदीपंपरिक
ल्पयामि नमः देवस्य त्वाचामरं नमः छत्रम् नमोवृत्तः आदर्शम् विलोबुधस्य अर्घ्यादानाद्यर्चनविधिः चन्द्र
मामनसो अन्नपते अन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिषऊर्जन्नोदेहि द्विपदेचतुष्पदे हवि
ष्यगर्भसुरूपम् गोधूमसमोदकाभ्यां च गुडसर्पिसमन्वितम् गृह्यतां च मया दत्तं नैवेद्यं प्रतिगृह्यताम् बुधरूप
हितिष्ठत्वं भक्तानामभयप्रद गृहाणपूजां मे नाथ प्रसादाभ्युदयनाप्रभो मधूकं खदिरश्चैव दशगयक्षसमन्विताः
नागपर्णानि दिव्यानि ताम्बूलं प्रतिगृह्यताम् मोदकैः शुष्ककासारैः गुडकैर्बदरैस्तथा क्षीरखण्डेन चान्ये
न प्रीयतां मे बुधः सदा मण्डकैर्घृतपूरैश्च सोकालिकैस्तथैव च फेनकैः शोकवर्तैश्च प्रीयतां मे बुधो मम यः
पूर्वमायवेदसेन यः फलिनीर्याफला इतिताम्बूलम् विलवे बुधायताम्बूलं नमः विलोर्नकं नाभ्यासीति
कुसुमाञ्जलिः बुद्धेदं प्रतिगृह्णातु दक्षिणा तानि मिदं व्रतं देहि मे धर्मकामांश्च सन्तोष्यन्ते भ्यग्रहोत्तम विलवे बुधा
य कुसुमाञ्जलिं नमः इडा गावनीधेनुमती समस्तास निति च बुधप्रदक्षिणम् ऊर्ध्वोधरोधचरिनोरोधयिनात्मा
नार्दनः सोम्यसोमनसं निनयंश्चैव शशिनन्दन प्रदक्षिणम् ततः पुष्पं दीपेन बुद्धिदाता बुद्धिदं जन्मनि जन्म
शुभं व्रतम् बुधस्मरति यो नित्यं तस्य प्रीतो भवतु सद्ग्रहः चन्द्रसूर्यबुधस्त्वं हि धर्मकीर्तिर्यशस्थिरं आयुरारोग्य
मैश्वर्यं देहि संपूजितो मया अद्यदिने अद्य यथा दक्षिणान्ते ॥ पुनः अग्निकर्म पात्रं तिला परिसमूह्य पर्युक्ष्य
परिषिच्य परिस्तीर्य सावित्राणि गणपतयेत्यादि पुरुषोत्तमाय गोविन्दाय अच्युताय बुधाय चन्द्रमसे
इन्द्रराजाय मिथिलाय ऊर्मिलाय प्रथामलाय धर्मराजाय अग्नये ४ समस्तयागदेवताभ्यः जुष्टं निर्वपा
मि एवं प्रोक्षणं आज्यभागान्ते आदोसमिद्धोमः तद्विष्णुः २८ त्र्यम्बकम् निषुसीदगणपते प्रोन्नादेवी

स्विष्टकृन्नम् प्रधानम् विष्णोर्नुकंवी इदंविष्णुः विष्णोरराटमसि नद्विष्णोः प्रतद्विष्णुःस्तवते वषट्कृ विष्णुः
योकेद्राग्रग्नो ईशानानाम्ना त्र्यम्बकं ग्रुथच्छन्नम् नामधेयम् अच्युतायेत्यादि ८ इन्द्रापर्वतादि ऐन्द्राग्नंतावत् त
नः इन्द्रहोमः विष्णोर्नुकं इदंविष्णुः विष्णोःराटमसि १८ पूर्ववत्प्रधानं स्वचककिना ततोग्न्यं प्रतद्विष्णुस्त्व यो
रुद्रोग्नौ १८ नित्रुमीदगणपते शन्नोदेवी स्विष्टकृन्नम् आज्येन वषट्कृ विष्णु ईशानानाम्ना १८ इन्द्रापर्वतादि ऐन्द्राग्नंता
वत् ततस्तर्पणम् ततः पंचामृतहोमं तिलतण्डुलआज्यंचक्षीरंशर्करायाम्बु एतत्पंचामृतंहोमंसर्वकर्मसुपावनं
पुरुषसूक्तकहृदयेवा लक्ष्मीसूक्तानियन्त्वाष्टतेन सहआज्येनहोमयेत् तर्पणम् आज्येनविष्णुपंचकं रुद्रपंचकं कूष्मा
ण्ड आज्येन अग्नये ६ ततः यवतिलहोमः आदौव्याहृतिः ततस्तर्पणम् विष्णोर्नुकमिदंविष्णो विष्णोरराटसंयुतं
यवतिलाहुतिशतत्रयंहुत्वा ३२४ अध्वर्यायिशन्नोदेवीतावत् पूर्ववत्प्रधानं इन्द्रापर्वतादिऐन्द्राग्नंतावत् यथावि
स्तारम् पृथक्पृथक्तर्पणं आज्येनदेवीपञ्चकं स्वाहामन्त्रं अनन्तेत्यादि पवित्रेकुम्भो इन्द्रभागान्तंतावत् नैवे
द्यंपूर्णान्तंतावत् अहम्याप्रातः स्नात्वा स्वस्थप्रकारेणन्यासंकृत्वा तीर्थस्नेय धूपदीपौ संकल्प्य दक्षिणा
न्ते पूर्ववत्कलशं प्रहाप्य सम्पाद्य ततः क्षमाप्रणम् पद्मस्याष्टदलस्याहोमध्येतुपुरुषोत्तमः योर्चितस्सम
याभक्त्याप्रीयतांवरदोमम १ पद्मस्यकर्णिकायान्तु भक्त्यासंपूजितोमया सर्वपापहरोदेवो गोविंदः प्रीय
तांमम २ पद्मस्यपूर्वभागेतुमध्युतस्त्वैवमोक्षदः पूजितास्तुमयाभक्त्या सुप्रीतास्तुजनार्दन ३ पद्मस्याग्नेय
भागेतु सोमपुत्रोबुधस्तथा अर्चितस्तुमयाभक्त्याप्रीयतांमम्यहोत्तमाः ४ पद्मस्यदक्षिणेभागेविन्यस्यैवचं
चन्द्रमाः पूजितस्तुमयाभक्त्याप्रीयतांमेग्रामिस्तथा ५ पद्मस्यनैरृतेभागेकुणराजस्तथैवच संपूजितोमया
भक्त्यासराजाप्रीयतांमम ६ पद्मस्यपश्चिमेभागेमिथिलापूजितास्तथा भक्त्याविनयपूर्वकमिथिलः प्रीयतां
मम

बु·था यमस्य वायुदेवे भागे ऊर्मिलानाम विष्णुना पूजितस्त्वं मया भक्त्या सा देवी वरदास्तु मे ८ यमस्य चोत्तरे भागे श्यामला
पृ·३ ख्या च विष्णुना भक्त्या संपूजिता चाथ सा देवी वरदास्तु मे ९ यमस्यैशानभागे तु धर्मराजस्तथैव च पूजितोसि मया
भक्त्या सा देवी वरदास्तु मे १० एवं क्रमेण भक्त्या च संपूजितास्तु देवता सुप्रीतास्तु तथा तुष्टा वरदाश्च भवन्तु मे ११
ततः क्षमापुष्पाणि ॐ कायिकं वाचिकं चैव मानसं विष्णुचिन्तनम् यन्मयोपार्जितं पापं तत्सर्वं हर मे हरे १ अज्ञा
13 नाद्येन यत्किंचिन्मयारब्धं व्रतं कृतम् भगवंस्त्वत्प्रसादेन पूर्णमस्तु महेश्वर २ बुद्धिदाता बुद्धस्त्वं हि धर्मकीर्ति
र्यशःस्थिरं आयुरारोग्यमैश्वर्यं देहि संपूजितो मया ३ चन्द्राजननमस्तुभ्यं विष्णुरूप नमोस्तु ते इन्दुकान्त नमस्ते
स्तु सर्वकामप्रदो भव ४ सोमात्मज नमस्तुभ्यं ग्रहराजाय वै नमः सर्वकामप्रदो नित्यं भव मे पापनाशन ५ स
मस्तासत्पथिष्यः दुर्बोधबोधचरति बोधयित्वा जनार्दनम् सौख्यं सौमनसं नित्यं करोतु शशिनन्दन ६ चन्द्र
सूर्यबुधस्त्वं हि धर्मकीर्तिर्यशःस्थिरम् आयुरारोग्यमैश्वर्यं देहि संपूजितो मया ७ अज्ञानाज्ज्ञानदौर्बल्याद्देश
कालादिविप्लवात् असंपूर्णगतं यच्च भूयात्संपूर्णमद्य तत् ८ नाल्पायुर्न दरिद्रश्च शोकदोषविवर्जितः पुत्र
वृद्धिं तथारोग्यं धनधान्यं समश्नुते ९ यद्बाल्ये यच्च कौमारे १० तमस्तमम् ११ जन्मे जन्मे पुनर्जातं भूतसर्ग
चतुर्विधम् नादेवी च यथा स्पर्शं च भोगमोक्षं नमाम्यहम् १२ गर्भवासे यथा बाल्ये यौवने वार्धकेपि वा सर्वनाश
य मे देवि भोगमोक्षं ददस्व मे १३ महाकाले महामाये प्रतिरीश्वरसन्निधे निर्विकारे निरालम्बे क्षमस्व परमेश्व
रि १४ ध्येयः सदा १५ आह्वाने १६ ततो ब्राह्मणानां कलशं प्रतिपादयेत् सावित्राणि आत्मनः बुधाष्टमी
व्रतोद्यापननिमित्तं अच्युताय अच्युतकलशं सहिरण्यं सवाससं सान्नं ददानि ३ प्रतिगृह्णामि सावित्राणि
आत्मनः बुधाष्टमीव्रतोद्यापननिमित्तं बुधाय बुधकलशं सहिरण्यं सवाससं सान्नं ददानि ३ प्रतिगृह्णामि

